कथनम् , चिकथयिषणम् ;
कथयित्वा, चिकथयिषित्वा ;
[1]प्रकथय्य[A], प्रचिकथयिष्य ;
कथम् २, } चिकथयिषम् २ ; }
कथयित्वा २, } चिकथयिषित्वा २. }

(163) "कदि आह्वाने रोदने च" (I-भ्वादिः-70. सक. सेट्. पर.)

आह्वाने सकर्मकः, अन्यत्राकर्मकः ।

'आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति । वैक्लव्ये तु तयोर्धात्वोः क्रन्दते कन्दते मितोः ॥' (श्लो-105) इति देवः ।

[2]कन्दकः-न्दिका, कन्दकः-न्दिकाः, चिकन्दिषकः-षिका, चाकन्दकः-न्दिका ;
कन्दिता-त्री, कन्दयिता-त्री, चिकन्दिषिता-त्री, चाकन्दिता-त्री ;
कन्दन्-न्ती, कन्दयन्-न्ती, चिकन्दिषन्-न्ती ; —
कन्दिष्यन्-न्ती-ती, कन्दयिष्यन्-न्ती-ती, चिकन्दिषिष्यन्-न्ती-ती ;
कन्द्यमानः, कन्दयिष्यमाणः, चाकन्द्यमानः, चाकन्दिष्यमाणः ;
कन्-कन्दौ-कन्दः ; — — —
कन्दितम्-तः, [B]कन्दितः-तं, चिकन्दिषितः, चाकन्दितः-तवान् ;
कन्दः, कन्दः, आकन्दी,[3] चिकन्दिषुः, चिकन्दयिषुः, चाकन्दः ;
कन्दितव्यम् , कन्दयितव्यम्, चिकन्दिषितव्यम् , चाकन्दितव्यम् ;
कन्दनीयम् ; कन्दनीयम्, चिकन्दिषणीयम् , चाकन्दनीयम् ;
कन्द्यम् , — कन्द्यम् , चिकन्दिष्यम् , चाकन्द्यम् ;
ईषत्कन्दः,-दुष्कन्दः-सुकन्दः ; — —
कन्द्यमानः, कन्द्यमानः, चिकन्दिष्यमाणः, चाकन्द्यमानः ;

---

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
2. 'इदितो नुम् धातोः' (7-1-58) इति नुम् ।
3. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिः ।

A. 'ग्रामेयकैर्नागरकैश्च लोकैर्निरीक्ष्यमाणा सह राजकीयैः ।
कर्मन्दिवन्द्या प्रकथय्य सेवं तिरोदधेऽनु स्तनयित्नुपद्याम् ॥' वा. वि. 3· 55.

B. 'मनोज्ञगण्डं तमनिन्दिताननं नन्दात्मजं शारदचन्द्रशीतलम् ।
पराक्रमत्रन्दनक्रन्दितासुरं संक्रन्दनक्रन्दितमीक्षितास्महे ॥' धा. का. 1-10.